## अपोनप्त्रपांनप्तृभ्यां घः । (२७/१२२९)

अपोनप्तृ अपांनप्तृ इत्येताभ्यां घः प्रत्ययो भवति साऽस्य देवता इत्यस्मिन् विषये । [1]अणोऽपवादः । 'अपोनप्त्रियं [2]हविः' (श. ब्रा. ३. २९. १२), अपांनप्त्रियम्[3] । अपोनपाद् अपांनपाद् इति[4]देवताया नामधेये एते । तयोस्तु प्रत्ययसन्नियोगेन रूपमिदं निपात्यते ॥

## छ च । (२८/१२३०)

अपोनप्तृ अपांनप्तृ इत्येताभ्यां [5]छकारः प्रत्ययो भवति सा अस्य देवता इत्यस्मिन् विषये । [6]अणोऽपवादः । 'अपोनप्त्रीयं हविः' (आप. श्रौ. २२.२२. २), '[7]अपांनप्त्रीयम्' (काठ. सं. १२. ६) । योगविभागः सङ्ख्यातानुदेश[8]परिहारार्थः ।

[४०७] छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसङ्ख्यानम् । (म. भा. २. २७६)

पैङ्गाक्षीपुत्रीयम्[9] । तार्णबिन्दवीयम्[10] (म. भा. २. २७६) ।

[४०८] शतरुद्राच्छश्च घश्च ।

'शतरुद्रीयम्' (तै. सं. ५. ४. ३. १), 'शतरुद्रियम्' (मै. ३. ३. ४) ॥

## महेन्द्राद् घाणौ च । (२९/१२३१)

महेन्द्रशब्दात् घाणौ प्रत्ययौ भवतः, चकाराच् छश्च, साऽस्य देवता इत्यस्मिन् [11]विषये । महेन्द्रो देवता अस्य महेन्द्रियम् हविः, 'माहेन्द्रम्' (तै. सं. ६. ५. ५. ३), 'महेन्द्रीयम्' (काठ. सं. १५. १) ॥

## सोमाट् ट्यण् । (३०/१२३२)

सोमशब्दात् ट्यण् प्रत्ययो भवति साऽस्य देवता इत्यस्मिन् [12]विषये । अणोऽपवादः । णकारो वृद्ध्यर्थः । टकारो ङीबर्थः । सोमो देवता अस्य सौम्यं हविः । [13]सौम्यं सूक्तम् । '[14]सौम्यी ऋक्' (मै. १.७.४) ॥

## वाय्वृतुपित्रुषसो यत् । (३१/१२३३)

वाय्वादिभ्यः शब्देभ्यः यत् प्रत्ययो भवति साऽस्य देवता इत्येतस्मिन् विषये । अणोऽपवादः । वायुः देवता अस्य वायव्यम् । [15]ऋतव्यम् । 'पित्र्यम्' (ऋ. ८. २०. १३) । [16]उषस्यम् ॥

---

1. अणोऽपवादः नास्ति फ. 2. हविः नास्ति फ. 3. हविः इत्यधिकम् ब. 4. देवतानामधेये क. 5. छकारप्रत्ययः क. 6. अणोऽपवादः नास्ति फ. 7. अपांनप्त्रीयं हविः क, नास्ति ह, अपांनप्त्रीयश्चरुः, (काठ. सं. 12.6) 8. निवृत्त्यर्थः फ. 9–10. हविः इत्यधिकम् ब. फ. 11. अर्थे फ. 12. अर्थे फ. 13. सौम्यं सूक्तम् नास्ति फ. 14. सौमा क. 15. ऋतव्या (तै. सं. 5. 3. 1). 16. उषस्या (मै. 3. 13. 5).